শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৪

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৪

*অষ্টাঙ্গযোগৱর্ণনং যোগসিদ্ধিৱর্ণনং চ*

কল্যতাং মম কুরুষ্ৱ তাৱতীং
    কল্যতে ভৱদুপাসনং যযা।
স্পষ্টমষ্টৱিধযোগচর্যযা
    পুষ্টযাশু তৱ তুষ্টিমাপ্নুযাম্॥ ১ ॥

ব্রহ্মচর্যদৃঢতাদিভির্যমৈ-
    রাপ্লৱাদিনিযমৈশ্চ পাৱিতাঃ।
কুর্মহে দৃঢমমী সুখাসনং
    পঙ্কজাদ্যমপি ৱা ভৱত্পরাঃ॥ ২ ॥

তারমন্তরনুচিন্ত্য সন্ততং
    প্রাণৱাযুমভিযম্য নির্মলাঃ।
ইন্দ্রিযাণি ৱিষযাদথাপহৃ-
    ত্যাস্মহে ভৱদুপাসনোন্মুখাঃ॥ ৩ ॥

অস্ফুটে ৱপুষি তে প্রযত্নতো
    ধারযেম ধিষণাং মুহুর্মুহুঃ।
তেন ভক্তিরসমন্তরার্দ্রতা-
    মুদ্ৱহেম ভৱদঙ্ঘ্রিচিন্তকাঃ॥ ৪ ॥

ৱিস্ফুটাৱযৱভেদসুন্দরং
    ত্ৱদ্ৱপুস্সুচিরশীলনাৱশাত্।
অশ্রমং মনসি চিন্তযামহে
    ধ্যানযোগনিরতাস্ত্ৱদাশ্রযাঃ॥ ৫ ॥

www.prapatti.com

ধ্যাযতাং সকলমূৰ্তিমীদৃশী-
মুন্মিষন্মধুৰতাহৃতাত্মনাম্।
সান্দ্ৰমোদৰসৰূপমান্তৰং
ব্ৰহ্মৰূপমযি তেৱভাসতে॥ ৬ ॥

ততসমাস্বদনৰূপিণীং স্থিতিং
ত্বতসমাধিমযি ৱিশ্বনাযক।
আশ্ৰিতাঃ পুনৰতঃ পৰিচ্যুতা-
ৱাৰভেমহি চ ধাৰণাদিকম্॥ ৭ ॥

ইত্থমভ্যসননিৰ্ভৰোল্লস-
ত্ত্বতপৰাত্মসুখকল্পিতোতসৱাঃ।
মুক্তভক্তকুলমৌলিতাং গতাঃ
সঞ্চৰেম শুকনাৰদাদিৱত্॥ ৮ ॥

ত্বতসমাধিৱিজযে তু যঃ পুন-
ৰ্মঙক্ষু মোক্ষৰসিকঃ ক্ৰমেণ ৱা।
যোগৱশ্যমনিলং ষডাশ্ৰযৈ-
ৰুন্নযত্যজ সুষুম্নযা শনৈঃ॥ ৯ ॥

লিঙ্গদেহমপি সংত্যজন্নথো
লীযতে ত্বযি পৰে নিৰাগ্ৰহঃ।
ঊৰ্ধ্বলোককুতুকী তু মূৰ্ধতঃ
সাৰ্ধমেৱ কৰণৈৰ্নিৰীযতে॥ ১০ ॥

অগ্নিৱাসৰৱলৰ্ক্ষপক্ষগৈ-
ৰুত্তৰাযণজুষা চ দৈৱতৈঃ।
প্ৰাপিতো ৰৱিপদং ভৱতপৰো
মোদৱান্ ধ্ৰুৱপদান্তমীযতে॥ ১১ ॥

আস্থিতোথ মহৰালযে যদা
শেষৱক্ত্ৰদহনোষ্মণাৰ্দ্যতে।
ঈযতে ভৱদুপাশ্ৰযস্তদা
ৱেধসঃ পদমতঃ পুৰৈৱ ৱা॥ ১২ ॥

www.prapatti.com

তত্ৰ ৰা তৱ পদেথৱা ৰসন
প্ৰাকৃতপ্ৰলয এতি মুক্ততাম্।
স্বেচ্ছযা খলু পুৰা ৰিমুচ্যতে
সংৰিভিদ্য জগদণ্ডমোজসা॥ ১৩ ॥

তস্য চ ক্ষিতিপযোমহোনিল-
দ্যোমহতপ্ৰকৃতিসপ্তকাৱৃতীঃ।
তত্তদাত্মকতযা ৰিশন্ সুখী
যাতি তে পদমনাৱৃতং ৰিভো॥ ১৪ ॥

অৰ্চিৰাদিগতিমীদৃশীং ব্ৰজন
ৰিচ্যুতিং ন ভজতে জগতপতে।
সচ্চিদাত্মক ভৱদগুণোদযা-
নুচ্চৰন্তমনিলেশ পাহি মাম্॥ ১৫ ॥

**********



www.prapatti.com